# MT

Seat No. | | | | | | | |

2018 .... .... 1100

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - PRELIM - I**
**PAPER - V**

**Time : 2 Hours** **(Pages 8)** **Marks : 50**

प्रथमः विभागः - सुगमसंस्कृतम् ।

प्र.१ अ) चित्रं दृष्ट्वा नामानि लिखत । (५ तः ४) ४

| | | | | | |
|---|---|---|---|---|---|
| १ |  | २ |  | ३ |  |
| | | | | | |
| ४ | मरीचिका  | ५ |  | | |
| | | | | | |

प्र.१ आ) सङ्ख्याः अक्षरैः अङ्कैः वा लिखत । (३ तः २) २

१. नव - २. ७३ -

३. पञ्चपञ्चाशत् -

प्र.१ इ) स्तम्भमेलनं कुरुत । (५ तः ४) २

| | अ | ब |
|---|---|---|
| १. | पञ्चाधिक त्रिवादनम् | १:४५ |
| २. | दशोन एकवादनम् | ४:३० |
| ३. | सपाद सप्तवादनम् | ३:०५ |
| ४. | पादोन द्विवादनम् | १२:५० |
| ५. | सार्ध चतुर्वादनम् | ७:१५ |

**प्र.१ ई) वासर - तालिकां पूरयत । (केऽपि २)** २

| परह्यः | ________ शनिवासरः | अद्य |
|---|---|---|
| ________ ← | ← | ________ |

## द्वितीयः विभागः - गद्यम् ।

**प्र.२ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

एकस्मिन् दिने शङ्करः स्नानार्थं पूर्णानदीं गतः । यदा सः स्नाने मग्नः तदा तत्र एकः नक्रः आगतः । नक्रः झटिति तस्य पादम् अगृह्णात् । तदा शङ्करः उच्चैः आक्रोशत् । ''अम्ब ! त्रायस्व । नक्रात् त्रायस्व ! आक्रोशं श्रुत्वा नदीतीरं प्राप्ता आर्याम्बा पुत्रं नक्रेण गृहीतमपश्यत् । भयाकुला सा अपि रोदनम् आरभत । शङ्करः मातरम् आर्ततया प्रार्थयत - ''अम्ब, इतः परम् अहं न जीवामि । मरणात् पूर्वं संन्यासी भवितुम् इच्छामि । अधुना वा देहि अनुमतिम् । चेतसा अनिच्छन्ती अपि विवशा माता अवदत् - ''वत्स, यथा तुभ्यं रोचते तथैव भवतु । इदानीमेव संन्यासं स्वीकुरु । मम अनुमतिः अस्ति इति । तत्क्षणमेव आश्चर्यं घटितम् । दैववशात् शङ्करः नक्राद् मुक्तः । स नदीतीरम् आगत्य मातुः चरणौ प्राणमत् ।

अनन्तरं शङ्करः मातरं संन्यासस्य महत्त्वम् अवाबोधयत् । संन्यासी न केवलम् एकस्याः पुत्रः । विशालं जगद् एव तस्य गृहम् । 'मातः, यदा त्वं स्मरिष्यसि तदा एव त्वत्समीपमागमिष्यामि इति मात्रे प्रतिश्रुत्य सः गृहात् निरगच्छत् । ततः गोविन्दभगवत्पादानां शिष्यो भूत्वा सः सर्वाणि दर्शनानि अपठत् । तेभ्यः संन्यासदीक्षां गृहीत्वा वैदिकधर्मस्य स्थापनार्थं प्रस्थानम् अकरोत् ।

अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित् ।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात् ॥

**१. अवबोधनम् । (४ तः ३)**

**क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।** १

आर्याम्बा रोदनम् आरभत यतः..........

(अ) शङ्करं नक्रेण गृहीतं दृष्ट्वा सा भीता जाता ।

(ब) नक्रः तस्याः पादम् अगृह्णात् ।

**ख) कः कं वदति ।** १

''इतः परम् अहं न जीवामि ।''

**ग) पूर्णवाक्येन उत्तरं लिखत ।** १
शङ्करः मात्रे किं प्रतिश्रुत्य गृहाद् निरगच्छत् ?

**घ) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?** १

**२. शब्दज्ञानम् । (३ तः २)**
**क) गद्यांशात् त्वान्त अव्यये चित्वा लिखत ।** १

**ख) विशेषण-विशेष्य-मेलनं कुरुत ।** १

| **विशेषणम्** | **विशेष्यम्** |
|---|---|
| विशालम् | नक्रः |
| विवशा | जगत् |
| | माता |

**ग) लकारं लिखत ।** १
अधुना वा **देहि** अनुमतिम् ।

**प्र.२ आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

अर्णवः - द्रव्यस्य अन्तिमः घटकः मूलं तत्त्वं च परमाणुः, सत्यं खलु ?
पिता - सत्यम् । अयं खलु कणादमहर्षेः सिद्धान्तः । अपि जानासि ? परमाणुः द्रव्यस्य मूलकारणम् इति तेन महर्षिणा प्रतिपादितम् । तदपि प्रायः खिस्तपूर्व पञ्चमे षष्ठे वा शतके ।
अर्णवः - तात, महर्षिणा कणादेन किं किम् उक्तं परमाणुविषये ? वयं तु केवलं तस्य महाभागस्य नामधेयम् एव जानीमः ।
पिता - कणादमुनिना प्रतिपादितम् - परमाणुः अतीन्द्रियः, सूक्ष्मः, निरवयवः, नित्यः, स्वयं व्यावर्तकः च । 'वैशेषिकसूत्राणि इति स्वग्रन्थे तेन परमाणोः व्याख्या कृता ।
अर्णवः - का सा व्याख्या ?
पिता - जालसूर्यमरीचिस्थं यत् सूक्ष्मं दृश्यते रजः ।
तस्य षष्ठतमो भागः परमाणुः स उच्यते ।।
अर्णवः - अहम् एतद्विषये विस्तरेण पठितुम् इच्छामि ।
पिता - उत्तमम् ! श्वः मम महाविद्यालयम् आगच्छ । तत्र कणादविषयकाणि नैकानि पुस्तकानि सन्ति । तव जिज्ञासा निश्चयेन शाम्येत् ।

**१. अवबोधनम् । ( ४ तः ३ )**

**क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।** १

(१) ................ द्रव्यस्य मूलकारणम्। (परमाणुः / विज्ञानं)

(२) रजसः ............. भागः परमाणुः। (षष्ठतमः / शततमः)

**ख) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।** १

पिता अर्णवाय स्वमहाविद्यालयम् आगन्तुं कथयति यतः .....।

(१) पितुः महाविद्यालये कणादविषयकाणि पुस्तकानि सन्ति।

(२) पितुः महाविद्यालये स्नेह - सम्मेलनम् अस्ति।

**ग) पूर्णवाक्येन उत्तरं लिखत ।** १

कः परमाणुः?

**घ) वाक्यं पुनर्लिखित्वा सत्यम् /असत्यम् इति लिखत ।** १

अर्णवस्य पितुः महाविद्यालये कणादविषयकाणि नैकानि पुस्तकानि सन्ति।

**२. जालरेखाचित्रं पूरयत ।** २




**प्र.२ इ) गद्यांशं पठित्वा माध्यमभाषया सरलार्थं लिखत । (२ तः १)** ४

१.

| | |
|---|---|
| नदी (विपाट्) | - किम् ? एषः मर्त्यः माम् माता इति सम्बोधयति ? |
| नदी (शुतुद्री) | - कथं माता न करोति साहाय्यं स्वपुत्रस्य ? साधु मानवश्रेष्ठ साधु ? किन्तु, कच्चित् तव वंशजाः मनुजाः तवेदं वचनं विस्मरिष्यन्ति ? |
| विश्वामित्रः | - न हि मातः, नैतत् शक्यम् । सर्वाः सरितः सुखं वहन्तु । सर्वे जनाः सुखिनः सन्तुः ।। (विश्वामित्रः निर्गच्छति ।) |

२.

| |
|---|
| (ततः प्रविशति याचकरूपेण शक्रः ।) |
| शक्रः - (कर्णमुपगम्य) भोः कर्ण, महत्तरां भिक्षां याचे । |
| कर्णः - दृढं प्रीतोऽस्मि भगवन् । एषोऽहं नमस्करोमि । |
| शक्रः - (आत्मगतम्) किं नु खल्वहं वदामि ? यदि दीर्घायुर्भवेति वदेयम् दीर्घायुर्भवेत् । यदि न वदेयम् मूढ इति मां परिभवति । तस्माद् उभयं परिहृत्य किं नु खलु भाषे ? भवतु, दृष्टम्। (प्रकाशम्) भोः कर्ण, सूर्य इव, चन्द्र इव, हिमवान् इव, सागर इव तिष्ठतु ते यशः । |

**प्र.२ ई) माध्यमभाषया उत्तरं लिखत । (२ तः १)** २

१) 'सः नरः शत्रुनन्दनः' इति वचनं कथायाः आधारेण स्पष्टीकुरुत।

२) शङ्करेण संन्यासार्थं कथम् अनुमतिः लब्धा?

## तृतीयः विभागः - पद्यम् ।

**प्र.३ अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत । (५ तः ४)**

| |
|---|
| अल्पानामपि वस्तूनां संहतिः कार्यसाधिका । |
| तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ॥१॥ |
| वैद्यराज नमस्तुभ्यं यमराजसहोदर । |
| यमस्तु हरति प्राणान् त्वं तु प्राणान् धनानि च ॥२॥ |
| यादृशं वपते बीजं क्षेत्रमासाद्य कर्षकः । |
| सुकृते दुष्कृते वाऽपि तादृशं लभते फलम् ॥३॥ |

**क) पूर्णवाक्येन उत्तरं लिखत ।** १

कर्षकः कीदृशं फलं लभते?

**ख) विशेषण-विशेष्य-मेलनं कुरुत ।** १

| | विशेषणम् | विशेष्यम् |
|---|---|---|
| १) | आपन्नैः | संहतिः |
| २) | कार्यसाधिका | तृणैः |
| | | धनानि |

**ग) जालरेखाचित्रं पूरयत ।** १




**घ) सन्धिविग्रहं कुरुत ।** १

१. वाऽपि - ............ + अपि ।

२. नमस्तुभ्यम् - ............ + तुभ्यम् ।

**च) षष्ठी - विभक्त्यन्तपदे चित्वा लिखत ।** १

**प्र.३ आ) श्लोकौ शुद्धौ पूर्णौ च लिखत । (३ तः २)** ४

१. आत्मनो .............. सर्वार्थसाधनम् ॥

२. तावद् .............. यथोचितम् ॥

३. यत्र .............. द्रुमायते ॥

**प्र.३ इ) माध्यमभाषया सरलार्थं लिखत । (२ तः १)** २

१. सर्वं व्याप्नोति सलिलं शर्करा लवणं यथा ।
एवं मानवताधर्मो धर्मान् व्याप्नोति सर्वथा ॥

२. वाचनं ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम् ।
वार्धक्ये दुःखहरणं हितं सद्ग्रन्थवाचनम् ॥

**प्र.३ ई) माध्यमभाषया उत्तरं लिखत । (२ तः १)** २

१. 'कं संजघान' इति श्लोकं माध्यमभाषया स्पष्टीकुरुत।

२. 'येथे केन प्रकारेण' इति उक्तिं स्पष्टीकुरुत।

## चतुर्थः विभागः - लेखनकौशलम् ।

**प्र.४ निर्दिष्टाः कृतीः कुरुत । (३ तः २)**

**अ) उपपदविभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत । (४ तः २)** २

१. अलम् →
२. कथ् →
३. कृते →
४. गम्-गच्छ् →

**आ) अनुवादं कुरुत । (४ तः २)** २

१. A Postman distributes letters.
२. Grandmother lights a lamp.
३. India is my Country.
४. Children play in the water.

**इ) अमरकोषात् समानार्थकं शब्दं योजयित्वा वाक्यं पुनर्लिखत । (४ तः २)** २

१. **कृषकः** क्षेत्रे बीजानि वपति ।
२. **नरः** सर्वदा सत्यं वदेत् ।
३. शङ्करेणः जटायां **गङ्गा** धार्यते ।
४. अनन्तभट्टः नाम **वैद्यः** वसति स्म ।

## पञ्चमः विभागः - भाषाभ्यासः ।

**प्र.५ अ) पृथक्करणम् ।**

**१. नामानि सर्वनामानि च पृथक्कुरुत । (५ तः ४)** २

( तुभ्यम्, पार्वती, अर्णवम्, भवति, हेतुना )

| नाम | सर्वनाम |
|---|---|
| | |

**२. क्रियापदानि धातुसाधित-विशेषणानि च पृथक्कुरुत । (५ तः ४)** २

(रक्षितः, बध्यन्ते, भवतु, कुर्वाणः, मन्यमानः)

| क्रियापदम् | धातुसाधित-विशेषणम् |
|---|---|
| | |

**प्र.५ आ) निर्दिष्टाः कृतीः कुरुत । (४ तः २)**

**१) सङ्ख्या / क्रम / आवृत्तिवाचकस्य योग्यं पर्यायं चित्वा वाक्यं पुनर्लिखत । (३ तः २)** २

१. भोजने ............ रसेषु मधुरः रसः मम प्रियः । (षट्सु / षट्)

२. सप्ताहस्य ............ संस्कृतवर्गः भवति । (त्रीणि / त्रिवारं)

३. पौषमासः संवत्सरस्य ............ मासः । (दशमः / दशमी)

**२) समासविग्रहानां समासनामभिः सह मेलनं कुरुत । (६ तः ४)** २

| | समासविग्रहाः | समासनामानि |
|---|---|---|
| १. | गङ्गा नाम नदी । | अव्ययीभावः समासः । |
| २. | जलं ददाति इति । | तृतीया - तत्पुरुषः समासः । |
| ३. | चिन्तया आकुला । | नञ् - तत्पुरुषः समासः । |
| ४. | क्षेत्रस्य पतिः । | उपपद - तत्पुरुषः समासः । |
| ५. | न शक्यम् । | कर्मधारयः समासः । |
| ६. | परिवारेण सह । | षष्ठी - तत्पुरुषः समासः । |

**३) समानार्थकं - विरुद्धार्थकं शब्दं लिखत । (४ तः २)** २

१. मनुष्यः - २. पण्डितः ×

३. सुकृतम् × ४. राजा -

( **मञ्जूषा** - मूढः, दुष्कृतम्, नृपः, नरः )

**४) योग्यं पर्यायं चिनुत । (३ तः २)** २

क. अहं प्रसन्ना भविष्यामि । (कर्तृवाच्यम् / कर्मवाच्यम्)

ख. त्वं धनुः ......... । (त्यजतु / त्यज)

ग. आर्याम्बा .............. जाता । (चिन्तामग्ना / चिन्तामग्नः)

**शुभं भवतु ✌**